# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (दशम अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ श्रीदुर्गासप्तशती ॥

॥ अथ दशमोऽध्यायः ॥

। ध्यानम् ।

ॐ उत्तप्तहेमरुचिरां(म्) रविचन्द्रवह्नि-
नेत्रां(न्) धनुश्शरयुताङ्कुशपाशशूलम् ।
रम्यैर्भुजैश्च दधतीं(म्) शिवशक्तिरूपां(ङ्),
कामेश्वरीं(म्) हृदि भजामि धृतेन्दुलेखाम् ॥

ॐ ऋषिरुवाच ॥ 1॥

निशुम्भं(न्) निहतं(न्) दृष्ट्वा, भ्रातरं(म्) प्राणसम्मितम् ।
हन्यमानं(म्) बलं(ञ्) चैव, शुम्भः(ख्) क्रुद्धोऽब्रवीद्वचः ॥ 2॥

बलावलेपाद्दुष्टे त्वं(म्), मा दुर्गे गर्वमावह ।
अन्यासां(म्) बलमाश्रित्य, युद्ध्यसे यातिमानिनी ॥ 3॥

देव्युवाच ॥ 4॥

एकैवाहं(ञ्) जगत्यत्र, द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव, विशन्त्यो मद्विभूतयः ॥ 5॥

ततः(स्) समस्तास्ता देव्यो, ब्रह्माणीप्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मु- रेकैवासीत्तदाम्बिका ॥ 6॥

देव्युवाच ॥ 7॥

अहं(वँ) विभूत्या बहुभि- रिह रूपैर्यदास्थिता ।
तत्सं(म्)हृतं(म्) मयैकैव, तिष्ठाम्याजौ स्थिरो भव ॥ 8॥

ऋषिरुवाच ॥ 9॥

ततः(फ्) प्रववृते युद्धं(न्), देव्याः(श्) शुम्भस्य चोभयोः ।
पश्यतां(म्) सर्वदेवाना- मसुराणां(ञ्) च दारुणम् ॥ 10॥

शरवर्षैः(श्) शितैः(श्) शस्त्रैस्- तथास्त्रैश्चैव दारुणैः ।
तयोर्युद्धमभूद्भूयः(स्), सर्वलोकभयङ्करम् ॥ 11॥

दिव्यान्यस्त्राणि शतशो, मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्- तत्प्रतीघातकर्तृभिः ॥ 12॥

मुक्तानि तेन चास्त्राणि, दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्र- हुङ्कारोच्चारणादिभिः ॥ 13॥

ततः(श्) शरशतैर्देवी- माच्छादयत सोऽसुरः ।
सापि तत्कुपिता देवी, धनुश्चिच्छेद चेषुभिः ॥ 14॥

छिन्ने धनुषि दैत्येन्द्रस्- तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण, तामप्यस्य करे स्थिताम् ॥ 15॥

ततः(ख्) खड्गमुपादाय, शतचन्द्रं(ञ्) च भानुमत् ।
अभ्यधावत्तदा देवीं(न्), दैत्यानामधिपेश्वरः ॥ 16॥

तस्यापतत एवाशु, खड्गं(ञ्) चिच्छेद चण्डिका ।
धनुर्मुक्तैः(श्) शितैर्बाणैश्- चर्म चार्ककरामलम् ॥ 17॥

हताश्वः(स्) स तदा दैत्यश्- छिन्नधन्वा विसारथिः ।
जग्राह मुद्गरं(ङ्) घोर- मम्बिकानिधनोद्यतः ॥ 18॥

चिच्छेदापततस्तस्य, मुद्गरं(न्) निशितैः(श्) शरैः ।
तथापि सोऽभ्यधावत्तां(म्), मुष्टिमुद्यम्य वेगवान् ॥ 19॥

स मुष्टिं(म्) पातयामास, हृदये दैत्यपुङ्गवः ।
देव्यास्तं(ञ्) चापि सा देवी, तलेनोरस्यताडयत् ॥ 20॥

तलप्रहाराभिहतो, निपपात महीतले ।
स दैत्यराजः(स्) सहसा, पुनरेव तथोत्थितः ॥ 21॥

उत्पत्य च प्रगृह्योच्चैर्- देवीं(ङ्) गगनमास्थितः ।
तत्रापि सा निराधारा, युयुधे तेन चण्डिका ॥ 22॥

नियुद्धं(ङ्) खे तदा दैत्यश्- चण्डिका च परस्परम् ।
चक्रतुः(फ्) प्रथमं(म्) सिद्ध- मुनिविस्मयकारकम् ॥ 23॥

ततो नियुद्धं(म्) सुचिरं(ङ्), कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास, चिक्षेप धरणीतले ॥ 24॥

स क्षिप्तो धरणीं(म्) प्राप्य, मुष्टिमुद्यम्य वेगितः ।
अभ्यधावत दुष्टात्मा, चण्डिकानिधनेच्छया ॥ 25॥

तमायान्तं(न्) ततो देवी, सर्वदैत्यजनेश्वरम् ।
जगत्यां(म्) पातयामास, भित्त्वा शूलेन वक्षसि ॥ 26॥

स गतासुः(फ्) पपातोर्व्यां(न्), देवीशूलाग्रविक्षतः ।
चालयन् सकलां(म्) पृथ्वीं(म्), साब्धिद्वीपां(म्) सपर्वताम् ॥ 27॥

ततः(फ्) प्रसन्नमखिलं(म्), हते तस्मिन् दुरात्मनि ।
जगत्स्वास्थ्यमतीवाप, निर्मलं(ञ्) चाभवन्नभः ॥ 28॥

उत्पातमेघाः(स्) सोल्का ये, प्रागासं(म्)स्ते शमं(यँ) ययुः ।
सरितो मार्गवाहिन्यस्- तथासं(म्)स्तत्र पातिते ॥ 29॥

ततो देवगणाः(स्) सर्वे, हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन्, गन्धर्वा ललितं(ञ्) जगुः ॥ 30॥

अवादयं(म्)स्तथैवान्ये, ननृतुश्चाप्सरोगणाः ।
ववुः(फ्) पुण्यास्तथा वाताः(स्), सुप्रभोऽभूद्दिवाकरः ॥ 31॥

जज्वलुश्चाग्नयः(श्) शान्ताः(श्), शान्ता दिग्जनितस्वनाः ॥ 32॥
॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ॥ 33॥

उवाच 4, अर्धश्लोकः 1, श्लोकाः 27, एवम् 32, एवमादितः ॥575॥